**आनुलोमिक** त्रि० अनुलोमं वर्त्तते अनुलोम+ठक् । अनुलोमाचारवति । स्त्रियां ङीप् ।

**आनुलोम्य** न० अनुलोमस्य भावः कर्म्म वा ब्राह्म० ष्यञ् । १अनुक्रमे "आनुलोम्येन सम्भूता जात्या ज्ञेयास्तएव ते । "एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ तथा स्मृतौ" इति च मनुः अनुकूलत्वे "क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः" सुश्रु०। [पश्चाद्भवादौ ।

**आनुवंश्य** त्रि० अनुवंशं भवः परिमुखा० ञ्य । वंशपृष्ठस्य

**आनुवेश्य** त्रि० "अनुवेशं वसति "अव्ययीभावाच्च" पा० ञ्य प्रातिवेश्यसन्निकृष्टगृहवासिनि । "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" मनुः ।"निरन्तरगृहवासी प्रातिवेश्यः तदन्तरगृहवासी आनुवेश्यः इति कुल्लू० अव्ययीभावाच्चेति सूत्रे परिमुखादिभ्य एवेष्यते इति नियमस्तु प्रायिकस्तेनात्रापीति बोध्यम् । [शतिकसम्बन्धिनि ।

**आनुशातिक** अनुशतिकस्येदम् अण् द्विपदवृद्धिः । अनु-

**आनुशासनिक** त्रि०अनुशासनाय हितं ठक् । १अनुशासनसाधने नीतिवाक्यादौ २राज्यनीतेरनुशासनार्थे भारतान्तर्गते पर्व्वभेदे । "ततः पर्व परिज्ञेयमानुशासनिकं परम्" भा० आ० १अ०।

**आनुश्रविक** त्रि०गुरुपाठादनुश्रूयते अनुश्रवोवेदस्तत्र विहितः ठक् । स्वर्गादिसाधनतया वेदविहिते कर्म्मसमूहे "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सां० का० । "नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनावृत्तियोगादपुरुषार्थत्वम्" सां०सू० ।

**आनुषङ्गिक** त्रि० अनुषङ्गात् आगतः ठक् स्त्रियां ङीप् । उद्देश्यान्तरप्रवृत्तस्य तत्कर्मनान्तरीयतया प्राप्ते प्रासङ्गिके अनुद्देश्ये "अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः" सि०कौ० यथा भो वटो ! भिक्षामट यदि गां पश्येः ताञ्चानयेत्यादौ भिक्षार्थप्रवृत्तस्य दैवात् गोदर्शनात्तस्या आनयनमानुषङ्गिकं तत्रोद्देश्यत्वाभावात् । [पूर्व्याम् ।

**आनुषक्** अव्य० आ+अनु–सन्ज–क्विप् स्वरा० । आनु-

**आनुषण्ड** त्रि० अनुषण्डे देशभेदे भवः कच्छा० अण् । अनुषण्डदेशभवे ।

**आनुष्टुभ** त्रि० अनुष्टुप् छन्दोऽस्य उत्सा० अञ् । १अनुष्टुप्छन्दस्के मन्त्रादौ ऋचि स्त्री ङीप् । "अनुष्टुवास्वाम्भोगवे आनुष्टुभे तृचे भवत" इति सामसं० भा० धृता श्रुतिः । अष्टुभ इदम् अञ् । २अनुष्टुप्सम्बन्धिनि । अनुष्टुप् सरस्वती देवताऽस्य अण् । ३सारस्वते हविरादौ" आनुष्टुभस्य हविषोयत्" ऋ० १०,१८१,१ । "आनुष्टुभोवा अश्वः" आनुष्टुभैषादिक्" शत०ब्रा० । अत्र छान्दसोङीबभावः स्वार्थे अण् । ४ अनुष्टुप्छन्दसि न० स्वार्थिकस्य क्वचित् प्रकृतिलिङ्गातिक्रमस्य देवतावदिष्टत्वात्लिङ्गान्यत्वम् ।

**आनुसाय्य** त्रि० अनुसायं भवः परिमुखा० ञ्य । सायस्य पश्चाद्भवादौ ।

**आनुसीत्य** त्रि० अनुसीतं भवः परिमुखा० ञ्य । लाङ्गलपद्धतेः पश्चाद्भवे । [ पश्चाद्भवादौ ।

**आनुसीर्य्य** त्रि० अनुसीरं भवः परिमुखा० ञ्य । लाङ्गल-

**आनुसूय** त्रि०अनुसूयया अत्रिपत्न्या दत्तम् अण् । अनुसूयया दत्ते "स्फुरत्प्रभामण्डलमानुसूयं सा बिभ्रती शाश्वतमङ्गरागम्" रघुः । [इनङ् च । अनुसरणभवे ।

**आनुसृतिनेय** त्रि० अनुसृतौ भवः शुभ्रा०ढक् कल्याण्या०

**आनुसृष्टिनेय** त्रि० अनुसृष्टौ भवः शुभ्रा० ढक् कल्या० इनङ् च । अनुसर्जनभवे ।

**आनुहारति** त्रि० अनुहरति भवः बाह्वा० इञ् अनुशति० द्विपदवृद्धिः। अनुहरणकुर्व्वति भवे ।

**आनूप** त्रि०अनूपदेशे भवः कच्छा० अण् । अनूपदेशभवे स्त्रियां ङीप् । २जलानुगतदेशभवे प्राणिवर्गे च तत्रत्यप्राणिनस्तन्मांसगुणाश्च सुश्रुते दर्शिता यथा "आनूपवर्गस्तु पञ्चविधः । तद्यथा कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति । तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोद्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः । वातपित्तहरा वृष्या मधुरा रसपाकयोः । शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः । विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः । स्वाद्वम्ललवणस्तेषां गजः श्लेष्मानिलापहः । गवयस्य तु मांसं हि स्निग्धं मधुरकासजित् । विपाके मधुरं चापि व्यवायस्य तु वर्द्धनम् । स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः । वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम् । तथा चमरमांसन्तु स्निग्धं मधुरकासजित् । विपाके मधुरं चापि वातपित्तप्रणाशनम् । सृमरस्य तु मांसञ्च कषायानुरसं स्मृतम् । वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् । स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु । स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनम् । कफघ्नं खड्गिमांसमिति कषायमनिलापहम् । पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् । गोकर्णमांसं मधुरं स्निग्धं मृदु कफा-